दिनाङ्कः- 19.05.2025

प्रात: - 06:55

<u>राष्ट्रपति, प्रधानमन्त्री - अग्निकाण्डम्</u>

राष्ट्रपतिपदासीना द्रौपदीमुर्मुः, प्रधानमन्त्री नरेन्द्रमोदी च तेलंगानाराज्यस्य गुलजार हाउस इति स्थले दुरापादितम् अग्निकाण्डम् अथ महाराष्ट्रस्य सौलापुरे यन्त्रागारे दुरापादितम् अग्निकाण्डं चाभिलक्ष्य शोकं प्रकटितवन्तौ। राष्ट्रपतिपदासीना द्रौपदीमुर्मुः संचारतन्त्रपटले समुल्लिखितवती यत् अग्निकाण्डेन जनानां मृत्योः सूचना अतीव दुखदायी। तया सर्वेभ्यः शोकसंतप्तपरिवारेभ्यः स्वीयसम्वेदना प्रकटिता, अथ हताहतानां शीघ्र- स्वास्थ्यलाभाय प्रार्थनां कृता। प्रधानमन्त्री नरेन्द्रमोदी मृतकानां परिजनेभ्यः प्रधानमन्त्री-राष्ट्रीय कोषात्, द्विलक्ष्यरूप्यकाणां अनुग्रहराशेः, अथ वणितेभ्यः पञ्चाशत्तसहस्ररुप्यकाणां अनुग्रहराशेः घोषणां कृतवान्।

<u>केन्द्रीय सूचना प्रसारण- राज्यमन्त्री</u>

केन्द्रीयः सूचना- प्रसारण- राज्यमन्त्री डॉ. एल. मुरूगन् इत्यसौ गतदिने बेग्लूरूनगरे मन्त्रालयस्य संचारतन्त्रीय- एकांशानां कार्यान्वयनस्य समीक्षां कृतवान्। असौ वरिष्ठाधिकारिभिः समं मन्त्रणां कृतवान्, गतिविधीनां विषये विस्तृतां सूचनां प्राप्तवान। असौ दूरदर्शनस्य विभिन्नकार्यक्रमाणां विषये अपि विस्तृतां सूचनां गृहीतवान्। असौ एक पेड़ मां के नाम इति कार्यक्रमान्तर्गतं दूरदर्शन - केन्द्र- परिसरे पादपारोपणम् अपि कृतवान्।

<u>भारतीय जनता पार्टी - दिल्ली</u>

भारतीय जनता पार्टी - इति दलेन गतदिने राष्ट्रीय - राजधान्यां विभिन्नेषु क्षेत्रेषु त्रिवर्णध्वजपरा- यात्रायाः आयोजनं कृतम्, यत्र पाकिस्तानं विरूध्य ऑपरेशन सिंदूर इति सैन्याभियानस्य सफलताम् अभिलक्ष्य हर्षोल्लासः प्रकटितः, सशस्रबलानां सम्मानमपि तत्र कृतम्।

आर के पुरम इति क्षेत्रे एकां जनसभां नवदेदल्याः सासंदमहोदया बांसुरी स्वराजः इत्येषा सम्बोधितवती, प्रोक्तवती च यत् एतस्यां यात्रायां महिलानां पूर्णसमर्थनं प्राप्तम्। अत्र महिलाः ऑपरेशन सिन्दूर इति सैन्याभियानम् आलक्ष्य ऐक्भावनाप्रकटनाय, भारतीय- सशस्त्र- बलेभ्यः धन्यवाद- ज्ञापनाय च आगतवत्यः। बांसुरी स्वराजः प्रोक्तवती यत् ऑपरेशन सिन्दूर इति सैन्याभियानं शक्ति- शौर्य- न्यायसंकल्पं प्रदर्शयति।

**भारतर्तुविज्ञानविभागेन**

भारतर्तुविज्ञानविभागेन पूर्वोत्तरभारते, पश्चिमबंगाले, सिक्किम प्रदेशे च आगामिषु पंचदिवसेषु झंझावात-वायु-विद्युद्द्योतनेन सह अतिवृष्टेः पूर्वानुमानं कृतम् । कर्नाटक्-कोंकण-गोवा- केरल - क्षेत्रेषु अतिवृष्टे: संभावना भारतीयऋतुविज्ञानविभागेन प्रकटिता।

**आईपीएल**

इण्डियन-प्रीमियर-लीग् इत्येतस्यां क्रिकेट-लीग-प्रतिस्पर्धायां गुजरात टाइटंस इत्येतेन दलेन देहली कैपिटल्स इति दलं दशस्तोभपुरस्परं पराजितम्। स्पर्धायां प्रथमं दण्डेन क्रीडयता देहली कैपिटल्स इति दलेन एकन्यूनदिशतं धावनांकाः समर्जिताः, प्रत्युत्तरे गुजरात टाइटंस इत्येतेन दलेन सहजतया एव लक्ष्यं समधिगम्य स्पर्धा विजिता। प्रतिस्पर्धायाम अद्य लखनऊ सुपर जायंट्स - सनराईजर्स हैदराबाद इत्येतयोः दलयोः मध्ये लखनऊनगरस्थे इकाना- क्रिकेट्- क्रीडांगणे सायं सार्धसप्तवादने द्वन्द्वं स्यात्।

।। इति वार्ता:।।